अन्नं नापि प्रभवति पानीयात् कुरुसत्तम ! ।
नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते ॥
अन्नौषध्यो महाराज ! वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! ॥
तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।
तच्च दद्यान्नरो नित्यं यदीच्छेद्भूतिमात्मनः ॥
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शत्रूंश्चाप्यधि कौन्तेय ! सदा तिष्ठति तोयदः ॥
सर्व्वकामानवाप्नोति कीर्त्तिञ्चैव शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥
तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥”

इति महाभारते दानधर्म्मः ॥ * ॥

“एकहस्ते धृतं तोयमभक्ष्यं सर्व्वसम्मतम् ॥”

इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥ * ॥

“उद्धृतं वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तुल्यं स्यात्मनुराह प्रजापतिः ॥”

इति मनुः ॥

तस्य वेदोक्तपर्य्यायाः । अर्णः १ क्षोदः २ क्षद्म ३ नभः ४ अम्भः ५ कबन्धम् ६ सलिलम् ७ वाः ८ वनम् ९ घृतम् १० मधु ११ पुरीषम् १२ पिप्पलम् १३ क्षीरम् १४ विषम् १५ रेतः १६ कशः १७ जन्म १८ वृबूकम् १९ बुसम् २० तुग्र्या २१ बर्व्वुरम् २२ सुक्षेम २३ धरुणम् २४ सुरा २५ अररिन्दानि २६ ध्वस्मन्वत् २७ जामि २८ आयुधानि २९ क्षपः ३० अहिः ३१ अक्षरम् ३२ स्रोतः ३३ तृप्तिः ३४ रसः ३५ उदकम् ३६ पयः ३७ रसः ३८ भेषजम् ३९ सहः ४० शवः ४१ यहः ४२ ओजः ४३ सुखम् ४४ क्षत्रम् ४५ आवयाः ४६ शुभम् ४७ यादुः ४८ भूतम् ४९ भुवनम् ५० भविष्यत् ५१ आपः ५२ महत् ५३ व्योम ५४ यशः ५५ महः ५६ स्वर्णीकम् ५७ स्वृतीकम् ५८ सतीनम् ५९ गहनम् ६० गभीरम् ६१ गम्भनम् ६२ ईम् ६३ अन्नम् ६४ हविः ६५ सद्म ६६ सदनम् ६७ ऋतम् ६८ योनिः ६९ ऋतस्ययोनिः ७० सत्यम् ७१ नीरम् ७२ रयिः ७३ सत् ७४ पूर्णम् ७५ सर्व्वम् ७६ अक्षितम् ७७ बर्हिः ७८ नाम ७९ सर्पिः ८० अपः ८१ पवित्रम् ८२ अमृतम् ८३ इन्दुः ८४ हेम ८५ स्वः ८६ सर्गाः ८७ शम्बरम् ८८ अभ्वम् ८९ वपुः ९० अम्बु ९१ तोयम् ९२ तूयम् ९३ कृपीटम् ९४ शुक्रम् ९५ तेजः ९६ स्वधा ९७ वारि ९८ जलम् ९९ जलाषम् १०० । इदमित्येकशतमुदकनामानि । इति वेदनिर्घण्टौ १ अध्यायः ॥ * ॥

अस्य गुणाः ।
पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासापहं
तन्द्राच्छर्द्दिविनाशनं बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥”
अथ तस्य भेदाः ।
“पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।
दिव्यं चतुर्व्विधं प्रोक्तं धाराजं करकाभवम् ॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥”
तत्र धारस्य लक्षणं गुणाश्च ।
“धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वा सुधायां वा धौतायां पतितञ्च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने मृण्मये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्द्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादिजीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत्पथ्यं विशेषात् प्रावृषि स्मृतम् ॥”
अथ धाराजलस्य भेदौ ।
“धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः ॥”
तत्रगाङ्गसामुद्रयोर्लक्षणं गुणाश्च ।
“आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टिं कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हैमने पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तद्गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ।
विस्रञ्च दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम् ।
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य दिशर्षेरुदयात् सकलं जलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्रलं स्याददोषलम् ॥”
अतएवाह ।
“फुत्कारविषवातेन नागानां व्योमचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥”
अथानार्त्तवजलगुणाः ।
“अनार्त्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितम् ॥”
अनार्त्तवं पौषादिमासचतुष्टयविषयम् ॥
अथ करकजलस्य लक्षणं गुणाश्च ।
“दिव्यवायग्निसंयोगात् संहताः खात् पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ॥
करकाजं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं सान्द्रं पित्तहृत्कफवातहृत् ॥”
अथ तौषारजललक्षणं गुणाश्च ।
“अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः ।
धूमावयवनिर्म्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥”
अपि नद्याः समुद्रान्ते वह्निः । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते । तद्भवाः वह्निभवाः । धूमावयवनिर्म्मुक्ताः धूमांशरहिताः आपस्तुषाराख्याः । तुष इति लोके तुस इति च ।
“अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः ।
तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् ॥
कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत् ॥”
अथ हैमजलस्य लक्षणं गुणाश्च ।
“हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्म्मनीषिणः ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ॥”
हैमं जलं कुहंसजलम् । अन्ये तु ।
“और्व्वानलधूमेरित-
मम्बु समुद्रस्य यद्घनीभूतम् ।
पवनानीतमुदीच्यां
तद्धिममिति कथ्यते मुनिभिः ॥
हिमं कुहंस इति लोके ।
हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममित्यपि ।
न तद्दूषयते वातं नच पित्तं न वा कफम् ॥” * ॥
अथ भौमं जलं तद्भेदाश्च ।
“भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥”
तेषां लक्षणानि गुणाश्च ।
“अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ज्ञातव्यो जाङ्गलो देशस्तत्रत्यं जाङ्गलं जलम् ॥
बहुवार्म्बहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
साधारणन्तु मधुरं दीपनं शीतलं लघु ॥
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥”
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
“नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ।
नद्यः शीघ्रवहा लघ्व्यः सर्व्वा याश्चामलोदका ॥
गुर्व्व्यः शैवालसंछन्ना मन्दगाः कलुषाश्च याः ।
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ॥
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥”
अथौद्भिदस्य लक्षणं गुणाश्च ।
“विदार्य्य भूमिं निम्नां यन्महत्या धारया स्रवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु ॥”
अथ नैर्झरस्य लक्षणं गुणाश्च ।
“शैलसानुस्रवद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुकं पाके वातलं स्यादपित्तलम् ॥”
अथ सारसस्य लक्षणं गुणाश्च ।
“नद्याः शैलादिरुद्धाया यत्र संमुद्य तिष्ठति ।
तत् सरो जलजच्छन्नं तदम्भः सारसं स्मृतम् ॥
सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बद्धमूत्रमलं सितम् ॥”
अथ तडागस्य लक्षणं गुणाश्च ।
“प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तडागः स्यात्ताडागं तज्जलं स्मृतम् ॥
ताडागमुदकं स्वादु कषायं कटुपाकि च ।
वातलं बद्धविण्मूत्रमसृक्पित्तकफापहम् ॥”
अथ वाप्यस्य लक्षणं गुणाश्च ।